प्रश्नपत्रप्रतिमा

अस्मिन् प्रश्नपत्रे ... प्रश्नाः सन्ति। .... मुद्रितपुटानि च सन्ति।

Roll No. अनुक्रमाङ्कः	४	५	०	१	५	९	१	८	३	०	०	१

Code No. गूढसंख्या **५५/SS/A/S**

स्तबकः **A**

Sanskrit Vyakaran

संस्कृतव्याकरणम्

(३४६)

Day and Date of Examination
परीक्षादिनं दिनाङ्कश्च ..... ______________________

Signature of two Invigilators
निरीक्षकयोः हस्ताक्षरम् १) ______________________
२) ______________________

सामान्या निर्देशाः

१. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।

२. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।

३. वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।

४. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।

५. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।

६. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूंन लेख्या।

७. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

संस्कृतव्याकरणम् (Sanskrit Vyakaran)

(३४६)

परीक्षासमयावधिः (Time) होरात्रयम् (३ Hrs) पूर्णाङ्काः (Full Marks) - १००

निर्देशाः -

१. अस्मिन् प्रश्नपत्रे [A] भागे ११, [B] भागे ११, [C] भागे ११, [D] ६ इति आहत्य ३९ प्रश्नाः सन्ति।

२. प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काःx प्रश्नाः=पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति।

३. समे प्रश्ना अनिवार्याः।

[A] दशानां युक्तं विकल्पं चिनुत। १ x १०=१०

१) लिङ्गं कस्य भवति।

(क) शब्दस्य (ख) अर्थस्य (ग) पदस्य (घ) अर्थस्य पदस्य च।

२) युवतिः इत्यत्र स्त्रीप्रत्ययविधायकं सूत्रं किम्।

(क) यूनस्तिः (ख) स्त्रियाम् (ग) षिद्गौरादिभ्यश्च (घ) पुंयोगादाख्यायाम्

३) वयसि प्रथमे इत्यस्य उदाहरणम् किम्।

(क) कुमारी (ख) अजा (ग) गौरी (घ) कुन्ता

४) बैदी इत्यत्र स्त्रीप्रत्ययविधायकं सूत्रं किम्।

(क) शार्ङ्गरवाद्यञौ ङिन् (ख) स्त्रियाम् (ग) षिद्गौरादिभ्यश्च (घ) पुंयोगादाख्यायाम्

५) क्षीयात् इति कस्मिन् लकारे रूपम्।

(क) विधिलिङ् (ख) लृट् (ग) आशीर्लिङ् (घ) लट्

६) चिक्षिय इति रूपे धातोः परं कः तिङ् प्रत्ययः।

(क) तिप् (ख) सिप् (ग) थस् (घ) थ

७) दिवादिगणीयधातुभ्यः कः विकरणप्रत्ययो भवति।

(क) शप् (ख) श्यन् (ग) श्नुः (घ) श्नम्।

८) हुश्नुवोः सार्वधातुके इति कस्य अपवादः।

(क) अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (ख) लोपश्चास्यान्यतरस्यां म्वोः

(ग) उतश्च प्रत्ययादसंयोगपूर्वात् (घ) दश्च

९) धातोः सन्प्रत्ययः कस्मिन्नर्थे भवति।

(क) भावार्थे (ख) स्वार्थे (ग) इच्छार्थे (घ) कर्मार्थे

१०) शैवः इत्यत्र कः प्रत्ययः विद्यते।

(क) अण् (ख) अञ् (ग) कञ् (घ) ठञ्।

[B] दशानां यथानिर्देशम् उत्तराणि लिखत। २ x १०=२०

१) विग्रहः कः। स च कतिविधः। १+१=२

२) केवलसमासस्य लक्षणं किम्। तस्य एकम् उदाहरणं लिखत। १+१=२

३) द्वित्रिभ्यां ष मूर्ध्नः इति सूत्रस्यार्थः कः। द्वित्रिभ्यां ष मूर्ध्नः इति सूत्रस्य किमुदाहरणम्। १+१=२

४) निष्ठा इति सूत्रस्यार्थं लिखत। निष्ठा इति केषां संज्ञा, केन च सूत्रेण विहिता। १+१=२

५) द्वन्द्वसमासविधायकं सूत्रं लिखत। तस्य अर्थमुदाहरणं च लिखत। १+१=२

६) जग्लौ इत्यत्र कः धातुः। कस्तदर्थः। कस्मिन् लकारे इदं रूपम्। १+१=२

७) अनुदात्तोपदेशादिसूत्रं पूरयत। तदर्थं च लिखत। १+१=२

८) सुधातोः लिटि मध्यमपुरुषबहुवचने कति रूपाणि भवन्ति। तानि च कानि। १+१=२

९) अतिष्ठिपत् इत्यत्र उपधायाः इकारादेशविधायकं सूत्रं किम्। तदर्थं च लिखत। १+१=२

१०) कन्यायाः कः आदेशः भवति। केन सूत्रेण भवति। १+१=२

[C] दश अनतिदीर्घोत्तरैः समाधत्त। ४ x १०=४०

१) उपकृष्णम् अधिहरि इति अनयोरेकं रूपं ससूत्रं साधयत।

२) कुमारी इत्वरी इत्यनयोरेकं रूपं ससूत्रं साधयत।

३) कुम्भकारः महाराज इति अनयोरेकं समासं ससूत्रं साधयत।

४) वृत्तिस्वरूपं लिखित्वा तद्भेदान् प्रतिपादयत।

५) बभूव अकटीत् इत्यनयोरेकं रूपं ससूत्रं साधयत।

६) एधामास एधस्व इत्यनयोरेकं रूपं ससूत्रं साधयत।

७) हु-झल्भ्यो हेर्धिः इति लुङ्सनोर्घसॢ इति अनयोरकं सूत्रं सोदाहरणं व्याख्यात।

८) पिपठिषति जिगमिषति इत्यनयोरेकं रूपं साधयत।

९) मीमांसकः इति रूपं ससूत्रं साधयत।

१०) गार्ग्यः इति रूपं सूत्रोल्लेखपुरःसरं साधयत।

[D] पञ्च दीर्घोत्तरैः समाधेयाः। ६ x ५=३०

१) तद्धितार्थोत्तरपदसमाहारे च इति सूत्रं व्याख्यात

२) विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् इति सूत्रं व्याख्यात।

३) भवति एधते इत्यनयोरेकं रूपं ससूत्रं साधयत।

४) असावीत् अरुणत् इत्यनयोरेकं रूपं ससूत्रं साधनीयम्।

५) ओः पुयण्ज्यपरे इति अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ इति योगयोरेकः सोदाहरणं व्याख्येयः।

--)(O)(--

प्रश्नपत्रप्रतिमाया उत्तरमाला

[A] दशानां युक्तः विकल्पः। १ x १०=१०

१-(ख), २-(क), ३-(क), ४-(क), ५-(ग), ६-(घ), ७-(ख), ८-(क), ९-(ग), १०-(क)

[B] दशानां यथानिर्देशम् उत्तराणि। २ x १०=२०

१) वृत्त्यर्थावबोधकं वाक्यं विग्रहः। स द्विविधः। लौकिकोऽलौकिकश्च। परिनिष्ठितत्वात्साधुर्लौकिकः। प्रयोगानर्होऽसाधुरलौकिकः।" इति। १+१=२

२) अव्ययीभावादिविशेषसंज्ञाभिः विनिर्मुक्तः यः समासः स केवलसमासः। तदुदाहरणं हि भूतपूर्वः इति। १+१=२

३) बहुव्रीहिसमासे द्वित्रिभ्यां परस्य मूर्ध्नः समासान्तः तद्धितसंज्ञकः षप्रत्ययो भवति। तदुदाहरणं हि द्विमूर्धः इति।१+१=२

४) निष्ठान्तं बहुव्रीहौ पूर्वं भवति। निष्ठा इति क्तक्तवतू निष्ठा इति सूत्रेण विहिता क्तप्रत्ययस्य क्तवतुप्रत्ययस्य च संज्ञा।१+१=२

५) द्वन्द्वसमासविधायकं सूत्रं तावत् - चार्थे द्वन्द्वः इति। तस्य अर्थो हि - अनेकं सुबन्तं चार्थे वर्तमानं विकल्पेन समस्यते, स च द्वन्द्वसंज्ञको भवति।उदाहरणं च ईषकृष्णौ इति। १+१=२

६) जग्लौ इत्यत्र ग्लै धातुः। हर्षक्षय इति तदर्थः। लिटि तिपि इदं रूपम्। १+१=२

७) अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति इति सूत्रम्। सूत्रार्थः - अनुनासिकान्तानामेषां वनतेश्च लोपः स्यात् झलादौ किति ङिति च परे। १+१=२

८) द्वे रूपे। ते च सुषुविढ्वे-सुषुविध्वे। १+१=२

९) तिष्ठतेरित् इति सूत्रम्। सूत्रार्थः - उपधाया इदादेशः स्याच्चङ्परे णौ। १+१=२

१०) कन्यायाः कनीन आदेशः भवति। स चादेशः कन्यायाः कनीन च इति सूत्रेण भवति। १+१=२

[C] स्वच्छन्दं दश अनतिदीर्घोत्तरैः समाधत्त। ४ x १०=४०

१) बिन्दुः - १.११ / १.८ द्रष्टव्यः

२) बिन्दुः - १०.३ / १०.६ द्रष्टव्यः

३) बिन्दुः - ४.५ / ४.११ द्रष्टव्यः

४) बिन्दुः - ८.१ द्रष्टव्यः

५) बिन्दुः - १४.१ / १९.९ द्रष्टव्यः

६) बिन्दुः - २०.४ / २०.१० द्रष्टव्यः

७) बिन्दुः - २१.५ / २१.७ द्रष्टव्यः

८) बिन्दुः - २५.२ / २५.८ द्रष्टव्यः

९) बिन्दुः - ३०.७ द्रष्टव्यः

१०) बिन्दुः - २८.६ द्रष्टव्यः

[D] छन्देन पञ्च दीर्घोत्तरैः समाधेयाः। ६ x ५=३०

१) बिन्दुः - ३.२ द्रष्टव्यः

२) बिन्दुः - १६.१ द्रष्टव्यः

३) बिन्दुः - १३.६ / २०.१ द्रष्टव्यः

४) बिन्दुः - २२.५ / २२.११ द्रष्टव्यः

५) बिन्दुः - २४.३ / २४.४ द्रष्टव्यः